सप्तमीञ्चर्षयो दिवा वसवोऽष्टौ तथाष्टमीम् ॥
नवमीं कृष्णपक्षस्य पिबतीन्द्रः कलामपि ।
दशमीं मरुतश्चापि रुद्रा एकादशीं कलाम् ।
द्वादशीन्तु कलां विष्णुर्धनदश्च त्रयोदशीम् ।
चतुर्दशीं पशुपतिः कलां पिबति नित्यशः ।
ततः पञ्चदशीञ्चैव पिबन्ति पितरः कलाम् ॥
कलावशिष्टो निष्पीतः प्रविष्टः सूर्य्यमण्डलम् ।
अमायां विशते रश्मौ अमावासी ततः स्मृता ॥
पूर्व्वाह्णे विशते चार्कं मध्याह्ने तु वनस्पतिम् ।
अपराह्णे विशत्यपस्तु स्वयोनिवारिसम्भवः ॥
आपः प्रविष्टः सोमस्य शेषया कलयैकया ।
तृणगुल्मलताश्चापि निष्पादयति चौषधीः ॥
तमोषधिं स्थितं गावश्चरन्त्यापः पिबन्ति च ।
तदङ्गानुगतं गोभ्यः क्षारत्वमुपगच्छति ॥
तत्क्षीरममृतं भूत्वा मन्त्रभूतं द्विजातयः ।
स्वाहाकारवषट्कारैर्जुह्वत्याहुतयः क्रमात् ॥
हुतमग्निषु देवाय पुनः सोमं विवर्द्धयेत् ।
एवं संक्षीयते सोमः क्षीणश्चाप्यायते पुनः ।
तस्मात् सूर्य्यः शशाङ्कस्य क्षयवृद्धिविधेर्व्विभुः ॥”
इति देवीपुराणे चन्द्रक्षयवृद्धिः ॥ * ॥
ब्रह्मोवाच ।
“यदयं वदते लोको बालिशत्वान्महामते ।
तदहं संप्रवक्ष्यामि चन्द्रसूर्य्योपरागिकम् ॥
यदि सत्वमयं ग्रस्तस्तेजोराशिर्दिवाकरः ।
तत्कथं नोदरस्थेन राहुणं भस्मसात् हृतः ॥
अथवा राहुणाक्रम्य शत्रुवक्त्रं प्रवेशितः ।
तत् कथं दशनैस्तीक्ष्णैः शतधा न विखण्डितः ॥
विमुक्तश्च पुनर्दृष्टस्तथैवाखण्डमण्डलः ।
न चास्यापहृतं तेजो न स्थानादपसारितः ॥
यदि वा ह्येष निष्पीतः कथं दीप्ततरोऽभवत् ।
तस्मान्न तेजसां राशी राहोर्वक्त्रं गमिष्यति ॥
भक्ष्यार्थं सर्व्वदेवानां सोमः सृष्टः स्वयम्भुवा ।
तत्रस्थममृतञ्चापि सम्भृतं सूर्य्यतेजसा ॥
पिबन्त्यमृतमयं देवाः पितरश्च स्वधामृतम् ।
त्रयश्च त्रिंशतश्चैव त्रयस्त्रिंशत्तथैव च ॥
त्रयश्च त्रिसहस्राश्च देवाः सोमं पिबन्ति ये ।
राहोरप्यमृतं भाग्यं पुरा सृष्टं स्वयम्भुवा ॥
तस्मात्तद्राहुरभ्यत्य पातुमिच्छति पर्व्वसु ।
उद्धृत्य पार्थिवीं छायां महाकारान्तमोमयः ॥
पातुमिच्छन् ततश्चेन्दुमाच्छादयति छायया ।
शुक्ले च चन्द्रमभ्येति स्वर्गो पर्व्वणि भास्करम् ॥
सूर्य्यमण्डलसंस्थन्तु चन्द्रमेव जिघांसति ।
तस्मात् पिबति तं राहुस्तनुमस्याविनाशयन् ॥
अविहिंसन् यथा पद्मं पिबति भ्रमरो मधु ।
चन्द्रस्थममृतं तद्वदभेदाद्राहुरश्नुते ॥
चन्द्रकान्तो मणिर्यद्वत्तुहिनं क्षरते चयात् ।
क्षरन्नपि न हीयेत तेजसा नैव मुच्यते ॥
यथा सूर्य्यमणिः सूर्य्यादुत्पाद्य पावकं शुभम् ।
न भवत्यङ्गहीनोऽपि तेजसा नैव मुच्यते ॥
एवं चन्द्रश्च सूर्य्यश्च छादितावपि राहुणा ।
स्वतेजसा न मुच्येते नाङ्गहीनौ बभूवतुः ॥
पर्व्वस्वथ च चन्द्रस्य मासिकमलसाकृतिः ।
सोमो दैवतसंयोगात् छायायोगाच्च पार्थिवात् ।
राहोश्च वरलब्धाद्वै प्रस्रवेदमृतं शशी ॥
स्वदोहकाले संप्राप्ते वत्सं दृष्ट्वा च गौर्यथा ।
स्वाङ्गादेव क्षरेत् क्षीरं तद्वदिन्दुः क्षरत्यमृतम् ।
पितेव सूर्य्यो देवानां सोमो भ्रातेव लक्ष्यते ॥
यथा मातुः स्तनं पीत्वा जीवन्ते सर्व्वजन्तवः ।
पीत्वामृतं तथा सोमात् तृप्यन्ते सर्व्वदेवताः ॥
सम्भृतं सर्व्वयोगेषु तथायं क्षरते शशी ।
तं क्षरन्तं यथाभागमुपजीवन्ति देवताः ॥
तस्मिन् काले समभ्येति राहुरप्यवकर्षति ।
सर्व्वमर्हन्ति भागञ्च पादं पादार्द्धमेव च ॥
आक्रम्य पार्थिवी छाया यावती चन्द्रमण्डलम् ।
स्मृतः स भागो राहोस्तु देवभागास्तु शेषकाः ॥
तृप्तिं विधाय देवानां राहोः पर्व्वगतस्य च ।
चन्द्रो न क्षयमायाति तेजसा नैव मुच्यते ॥
तिथिभागाश्च यावन्तः पुनस्त्यर्कं प्रमाणतः ।
सर्व्वच्छायास्थितः कालस्तावानेव प्रकीर्त्तितः ॥
अतो राहुभुजः सोमः सोमादूर्द्धं दिवाकरः ।
पर्व्वकाले स्थितिस्त्वेवं विपरीताः पुनः पुनः ॥
अतश्छादयते राहुरभ्रवच्छशिभास्करौ ।
राहुरभ्रकसंस्थानः सोममाच्छाद्य तिष्ठति ॥
उद्धृत्य पार्थिवीं छायां धूममेघ इवोत्थितः ।
चन्द्रस्य यदवस्थत्वं राहुणा भास्करस्य च ॥
नाम्नावखण्डितं तस्य कैवल्यं श्यामलीकृतम् ।
कर्द्दमेन यथा वस्त्रं शुक्लमप्युपहन्यते ॥
एकोद्देशोऽथ सर्व्वदा राहुणा चन्द्रमास्तथा ।
प्रक्षालितं तदेवेह पुनः शुक्लतरं भवेत् ॥
राहुमुक्तं भवेत्तद्वन्निर्म्मलं चन्द्रमण्डलम् ।
राहुणा छादितौ वापि दृष्ट्वा चन्द्रदिवाकरौ ॥
विप्राः शान्तिपरा भूत्वा पुनराप्याययन्ति तम् ।
एवं न गृह्यते सूर्य्यश्चन्द्रमास्तत्र गृह्यते ॥
अबुधास्तं न पश्यन्ति मानुषा मांसचक्षुषः ।
जगत्सम्मोहनं चैतत् ग्रहणं चन्द्रसूर्य्ययोः ॥”
इत्याद्ये देवीपुराणे ग्रहणविकल्पः ॥ * ॥
विधोर्द्देवपिशाचाद्यमकारणत्वं राजयक्ष्मादिकारणत्वञ्च कालिकापुराणे २०।२१ अध्याययोर्द्रष्टव्यम् ॥ * ॥ (कर्त्तरि, त्रि । यथा, ऋग्वेदे । १० । ५५ । ५ ।

“विधुं दद्राणं समने बहूनां
युवानं सन्तं पलितो जगार ॥”

“विधुं विधातारं सर्व्वस्य युद्धादेः कर्त्तारं विपूर्व्वो दधातिः करोत्यर्थे ।” इति तद्भाष्ये सायणः ॥)

विधुतः, त्रि, (वि+धु+क्तः ।) त्यक्तः । इत्यमरः ॥ (यथा, भागवते । ६ । १६ । २५ ।

“स तत्र निर्म्मुक्तसमस्तसङ्ग
आत्मानुभूत्या विधुतत्रिलिङ्गः ।
परेऽमले ब्रह्मणि वासुदेवे
लेभे गतिं भागवतीं प्रतीतः ॥”)

कम्पितश्च ॥

विधुतिः, स्त्री, कम्पनम् । विपूर्व्वधुधातोः क्तिप्रत्ययेन निष्पन्ना ॥ (यथा, भागवते । १० । ३३ । ८ ।

“पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासैर्भज्यन्मध्यैश्चलकुचपटैः कुण्डलैर्गण्डलोलैः ॥”

निराकृतिः । यथा, तत्रैव । ४ । २२ । ३८ ।

“यस्मिन्निदं सदसदात्मतया विभाति
मायाविवेकविधुतिस्रजि वाहिबुद्धिः ॥”)

विधुननं, क्ली, (वि+धू+णिच् । ल्युट् । नुक् च । पृषोदरादित्वात् ह्रस्वः ।) कम्पनम् । इति जटाधरः ॥

विधुन्तुदः, पुं, (विधुं तुदति पीडयतीति । विधु+तुद+“विध्वरुषोस्तुदः ।” ३ । २ । ३५ । इति खश् । मुम् ।) राहुः । इत्यमरः ॥ (यथा, माघे । २ । ६१ ।

“नीतिरापदि यद्गम्यः परस्तन्मानिनो ह्रिये ।
विधुर्विधुन्तुदस्येव पूर्णस्तस्योत्सवाय सः ॥”)

विधुपञ्जरः, पुं, (विधोः पञ्जरः वक्षास्थि इव तत्-सादृश्यात् ।) खड्गः । इति शब्दमाला ॥

विधुप्रिया, स्त्री, (विधोश्चन्द्रस्य प्रिया ।) चन्द्रपत्नी । यथा । दाक्षायण्यो विधुप्रिया । इति कोषान्तरम् ॥

विधुरं, क्ली, (विगता धूर्भारो यस्मात् । समासे अः ।) प्रविश्लेषः । इत्यमरः ॥ कैवल्यम् । इति त्रिकाण्डशेषः ॥ (प्रत्यवायः । कष्टम् । यथा, किरातटीकायां मल्लिनाथधृतवैजयन्ती ।

“विधुरं प्रत्यवाये स्यात् कष्टविश्लेषयोरपि ॥”

तथा च किराते । २ । ७ ।

“विधुरं किमतः परं परै-
रवगीतां गमिते दशामिमाम् ।
अवसीदति यत् सुरैरपि
त्वयि सम्भावितवृत्ति पौरुषम् ॥”)

विधुरः, त्रि, (विगता धूः कार्य्यभारो यस्मात् । ऋक्पूरित्यः ।) विकलः । इति मेदिनी । रे, २१६ ॥ (यथा, कुमारे । ४ । ३२ ।

“तदिदं क्रियतामनन्तरं
भवता बन्धुजनप्रयोजनम् ।
विधुरां ज्वलनातिसर्ज्जनात्
ननु मां प्रापय पत्युरन्तिकम् ॥”)

विधुरा, स्त्री, रसाला । इति मेदिनी । रे, २१६ ॥ (जत्रूर्द्ध्वस्थमर्म्म । यथा, सुश्रुते । ३ । ६ ।

“जत्रूर्द्ध्वं मर्म्माणि चतस्रो धमन्योऽष्टौ मातृका द्वे कृकाटिके द्वे विधुरे ॥”)

विधुवनं, क्ली, (वि+धु+ल्युट् । कुटादित्वात् साधुः ।) कम्पनम् । इत्यमरः । ३ । २ । ४ ॥

विधूतं, त्रि, (वि+धू+क्तः ।) कम्पितम् । (यथा, कलाविलासे । २ । २८ ।

“तं वदति सोऽन्यदृष्टिः सभ्रूभङ्गं विधूतहस्ताग्रः ।
वञ्चकवचनः पापो वृत्तिक्षीणः कुतोऽयमायातः ॥”)

त्यक्तम् । इति हेमचन्द्रः ॥ (यथा, महागणपतिस्तोत्रे । १ ।

“योगं योगविदां विधूतविविधव्यासङ्गशुद्धाशयप्रादुर्भूतसुधारसप्रसृमरध्यानास्पदाध्यासिनाम् ॥”)